# হেরম্বস্তোত্রং গৌরিকৃতম্

{॥ হেরম্বস্তোত্রং গৌরিকৃতম্ ॥}

শ্রী গণেশায নমঃ ।

গৌর্যুবাচ ।

গজানন জ্ঞানবিহারকারিন্ন মাং চ জানাসি পরাবমর্ষাম্ ।

গণেশ রক্ষস্ব ন চেচ্ছরীরং ত্যজামি সদ্যস্ত্বযি ভক্তিযুক্তা ॥ ১॥

বিঘ্নেশ হেরম্ব মহোদর প্রিয লম্বোদর প্রেমবিবর্ধনাচ্যুত ।

বিঘ্নস্য হর্তাঽসুরসঙ্ঘহর্তা মাং রক্ষ দৈত্যাত্ত্বযি ভক্তিযুক্তাম্ ॥ ২॥

কিং সিদ্ধিবুদ্ধিপ্রসরেণ মোহযুক্তোঽসি কিং বা নিশি নিদ্রিতোঽসি ।

কিং লক্ষলাভার্থবিচারযুক্তঃ কিং মাং চ বিস্মৃত্য সুসংস্থিতোঽসি ॥ ৩॥

কিং ভক্তসঙ্গেন চ দেবদেব নানোপচারৈশ্চ সুযন্ত্রিতোঽসি ।

কিং মোদকার্থে গণপাদ্ধৃতোঽসি নানাবিহারেষু চ বক্রতুণ্ড ॥ ৪॥

স্বানন্দভোগেষু পরিহৃতোঽসি দাসীং চ বিস্মৃত্য মহানুভাব ।

আনন্ত্যলীলাসু চ লালসোঽসি কিং ভক্তরক্ষার্থসুসঙ্কটস্থঃ ॥ ৫॥

অহো গণেশামৃতপানদক্ষামরৈস্তথা বাঽসুরপৈঃ স্মৃতোঽসি ।

তদর্থনানাবিধিসংযুতোঽসি বিসৃজ্য মাং দাসীমনন্যভাবাম্ ॥ ৬॥

Stotram Digitalized By Sanskritdocuments.org

রক্ষস্ব মাং দীনতমাং পরেশ সর্বত্র চিত্তেষু চ সংস্থিতস্ত্বম্ ।

প্রভো বিলম্বেন বিনাযকোঽসি ব্রহ্মেশ কিং দেব নমো নমস্তে ॥ ৭॥

ভক্তাভিমানীতি চ নাম মুখ্যং বেদে ত্বভাবান্ নহি চেন্মহাত্মন্ ।

আগত্য হত্বাঽদিতিজং সুরেশ মাং রক্ষ দাসীং হৃদি পাদনিষ্ঠাম্ ॥ ৮॥

অহো ন দূরং তব কিঞ্চিদেব কথং ন বুদ্ধীশ সমাগতোঽসি ।

সুচিন্ত্যদেব প্রজহামি দেহং যশঃ করিষ্যে বিপরীতমেবম্ ॥ ৯॥

রক্ষ রক্ষ দযাসিন্ধোঽপরাধান্মে ক্ষমস্ব চ ।

ক্ষণে ক্ষণে ত্বহং দাসী রক্ষিতব্যা বিশেষতঃ ॥ ১০॥

স্তুবত্যামেব পার্বত্যাং শঙ্করো বোধসংযুতঃ ।

বভূব গণপানাং বৈ শ্রুত্বা হাহারবং বিধেঃ ॥ ১১॥

গণেশং মনসা স্মৃত্বা বৃষারূঢঃ সমাযযৌ ।

ক্ষণেন দৈত্যরাজং তং দৃষ্ট্বা ডমরুণাহনত্ ॥ ১২॥

ততঃ সোঽপি শিবং বীক্ষ্যালিঙ্গিতুং ধবিতোাআভবত্ ।

শিবস্য শূলিকাদীনি শস্ত্রাণি কুণ্ঠিতানি বৈ ॥ ১৩॥

তং দৃষ্ট্বা পরমাশ্চর্যং ভযভীতো মহেশ্বরঃ ।

সস্মার গণপং সোঽপি নির্বিঘ্নার্থং প্রজাপতে ॥ ১৪॥

পার্বত্যাঃ স্তবনং শ্রুত্বা গজাননঃ সমাযযৌ ।

ইতি মুদ্গলপুরাণোক্তং হেরম্বস্তোত্রং সম্পূর্ণম্ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)

and Amith K Nagaraj (amithkn@rediffmail.com)

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Heramba Stotram ( Gowri krutha ) Lyrics in Bengali PDF
% File name : gaurikRitaMherambastotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : mudgalapurANe
% Latest update : September 16, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website